आपदुन्मूलन श्री दुर्गा स्तोत्रं

आपदुन्मूलन श्री दुर्गा स्तोत्रं

लक्ष्मीशे योगनिद्रां प्रभजति भुजगाधीशतल्पे सदर्पा-
-वुत्पन्नौ दानवौ तच्छ्रवणमलमयांगौ मधुं कैटभं च |
दृष्ट्वा भीतस्य धातुः स्तुतिभिरभिनुतां आशु तौ नाशयंतीं
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय || 1 ||

युद्धे निर्जित्य दैत्यस्त्रिभुवनमखिलं यस्तदीयेषु धिष्ण्ये-
-ष्वास्थाय स्वान् विधेयान् स्वयमगमदसौ शक्रतां विक्रमेण |
तं सामात्याप्तमित्रं महिषमपि निहत्यास्य मूर्धाधिरूढां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय || 2 ||

विश्वोत्पत्तिप्रणाशस्थितिविहृतिपरे देवि घोरामरारि-
-त्रासात्त्रातुं कुलं नः पुनरपि च महासंकटेष्वीदृशेषु |
आविर्भूयाः पुरस्तादिति चरणनमत्सर्वगीर्वाणवर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय || 3 ||

हंतुं शुंभं निशुंभं विबुधगणनुतां हेमडोलां हिमाद्रा-
-वारूढां व्यूढदर्पान् युधि निहतवतीं धूम्रदृक्चंडमुंडान् |
चामुंडाख्यां दधानां उपशमितमहारक्तबीजोपसर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय || 4 ||

ब्रह्मेशस्कंदनारायणकिटिनरसिंहेंद्रशक्तीः स्वभृत्याः
कृत्वा हत्वा निशुंभं जितविबुधगणं त्रासिताशेषलोकं |
एकीभूयाथ शुंभं रणशिरसि निहत्यास्थितामात्तखड्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय || 5 ||

उत्पन्ना नंदजेति स्वयमवनितले शुंभमन्यं निशुंभं
भ्रामर्याख्यारुणाख्या पुनरपि जननी दुर्गमाख्यं निहंतुं |
भीमा शाकंभरीति त्रुटितरिपुभटां रक्तदंतेति जातां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय || 6 ||

त्रैगुण्यानां गुणानां अनुसरणकलाकेलि नानावतारैः
त्रैलोक्यत्राणशीलां दनुजकुलवनवह्निलीलां सलीलां |
देवीं सच्चिन्मयीं तां वितरितविनमत्सत्रिवर्गापवर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय || 7 ||

सिंहारूढां त्रिनेत्रीं करतलविलसच्छंखचक्रासिरम्यां
भक्ताभीष्टप्रदात्रीं रिपुमथनकरीं सर्वलोकैकवंद्यां |
सर्वालंकारयुक्तां शशियुतमकुटां श्यामलांगीं कृशांगीं
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय || 8 ||

त्रायस्व स्वामिनीति त्रिभुवनजननि प्रार्थना त्वय्यपार्था
पाल्यंतेऽभ्यर्थनायां भगवति शिशवः किंत्वनन्याः जनन्याः |
तत्तुभ्यं स्यान्नमस्येत्यवनतविबुधाह्लादिवीक्षाविसर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय || 9 ||

एतं संतः पठंतु स्तवमखिलविपज्जालतूलानलाभं
हृन्मोहध्वांतभानुप्रथितमखिलसंकल्पकल्पद्रुकल्पं |
दौर्गं दौर्गत्यघोरातपतुहिनकरप्रख्यमंहोगजेंद्र-
-श्रेणीपंचास्यदेश्यं विपुलभयदकालाहिताक्ष्यप्रभावं || 10 ||

इति आपदुन्मूलन श्री दुर्गा स्तोत्रं |